শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী ভরদ্বাজমুনিভিরনুগৃহীতম্

# ॥ শ্রী নৃসিংহ দ্বাত্রিংশৎ বীজমালা স্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রী নৃসিংহ দ্ৱাত্রিংশৎ বীজমালা স্তোত্রম্॥

উদ্গীতাঢ্যং মহাভীমং ত্রিনেত্রঞ্চোগ্র ৱিগ্রহম্।
উজ্জ্ৱলং তং শ্রিযাজুষ্টং শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **1**॥

গ্রন্থান্ত ৱেদ্যং দেৱেশং গগনাশ্রয ৱিগ্রহম্।
গর্জনাত্রস্ত ৱিশ্ৱাণ্ডং শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **2**॥

ৱীথিহোত্রেক্ষণং ৱীরং ৱিপক্ষক্ষযদীক্ষিতম্।
ৱিশ্ৱংবরং ৱিরূপাক্ষং শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **3**॥

রঙ্গনাথং দযানাথং দীনবন্ধুং জগদ্গুরুম্।
রণকোলাহলং ধীরং শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **4**॥

মন্ত্ররাজাসনারূঢং মার্তাণ্ডোজ্জ্ৱল তেজসম্।
মণিরত্ন কিরীটাঢ্যং শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **5**॥

হাহাহূহ্ৱাদি গন্ধর্ৱৈঃ স্তূযমান পদাংবুজম্।
উগ্ররূপধরং দেৱং শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **6**॥

ৱিধি ৱেদ প্রদং ৱীরং ৱিঘ্ননাশং রমাপতিম্।
ৱজ্রখড্গধরং ধীরং শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **7**॥

ৱিষ্ণু শব্ধ দলস্তম্ভং দুষ্টরাক্ষস নাশনম্।
দুর্নিরীক্ষং দুরাধর্ষং শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **8**॥

জ্ৱলৎপাৱকসঙ্কাশং জ্ৱালামালা মুখাংবুজম্।
দারিদ্র্য নাশনং শ্রী তং শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **9**॥

লং বীজং দেৱতানাথং দীর্ঘৱৃত্ত মহাভুজম্।
লক্ষ্ম্যালিঙ্গিত ৱক্ষস্কং শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **10**॥

তন্ত্রীভূজ জগৎকৃৎস্নং ধর্মৱৈকুণ্ঠ নাযকম্।
মন্ত্রজাপক সান্নিধ্যং শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **11**॥

সৱাণ্ড কোশ মালাঢ্যং সৱাণ্ডান্তর ৱাসিনম্।
অষ্টাস্যকণ্ঠ ভেরণ্ডং শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **12**॥

তোমরাঙ্কুশ ৱজ্রাণাং সম দংষ্ট্রৈর্মুখৈঃস্থিতম্।
শত্রুক্ষযকরং ৱ্যাঘ্রং শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **13**॥

মুনিমানস সঞ্চারং ভুক্তি মুক্তি ফলপ্রদম্।
হযাস্যং জ্ঞানদাতারং শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **14**॥

কং শব্দ কঙ্কণোপেতং কমলাযত লোচনম্।
সর্ৱৈশ্ৱর্যপ্রদং ক্রোডং শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **15**॥

নৃলোক রক্ষণপরং ভূতোচ্চাটন তৎপরম্।
আঞ্জনেযমুখং ৱীরং শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **16**॥

সিতৱর্ণং দীর্ঘনাসং নাগাভরণ ভূষিতম্।
গরুডাস্যং মহাধীরং শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **17**॥

স্হং স্হং স্হং শব্দসহিতং মানৱারাধনোৎসুকম্।
ভল্লূক ৱক্ত্রং ভীতিঘ্নং শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **18**॥

ভীমাক্ষ নাসিকোপেতং ৱেদগ্রহণ তৎপরম্।
ধরণীধৃত মুৎসঙ্গং শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **19**॥

ষডৱক্ত্র পূজিতাঙ্ঘ্র্যব্জং ধৃষ্টকোদ্ধৃত মণ্ডলম্।
কোমলাঙ্গং মহাসত্ৱং শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **20**॥

ণংকার কিঙ্কিণী জালং জ্ঞানমূর্তিং ধরাপতিম্।
ৱরাহাঙ্গং মুদারাঙ্গং শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **21**॥

ভযঘ্নং সর্ৱভূতানাং প্রহ্লাদাভীষ্ট দাযিনম্।
নৃসিংহস্তম্ভ সংবোধ্যং শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **22**॥

দ্রৱ্য যাচ্ঞাপরং ৱিপ্রং বলিমানমুষং হরিম্।
ৱামনং রূপমাস্থায শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **23**॥

মৃত্যুরূপং ক্ষত্রিযাণাং মুগ্ধস্নিগ্ধমুখাংবুজম্।
জামদগ্ন্যং পরং দেৱং শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **24**॥

দ্যুং শব্দযুক্ত কোদণ্ডং দুষ্টরাৱণ মর্দনম্।
রামং কমলপত্রাক্ষং শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **25**॥

মৃদঙ্গগীতপ্রণৱশ্রৱণাসক্তমানসম্।
বলরামং হলধরং শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **26**॥

দ্যুং দ্যুং দ্যুং দ্যুং ৱেণু নাদং ব্রহ্মরুদ্রাদি সেৱিতম্।
যশোদা তনযং কৃষ্ণং শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **27**॥

নলিনাক্ষং অগ্নিরূপং ম্লেচ্ছনাশন তৎপরম্।
জ্ৱালামালাপূরিতাঙ্গং শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **28**॥

মানাযকং মহাসৎৱং মমাভীষ্ট প্রদাযকম্।
মদ্রক্ষণপরং শান্তং শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **29**॥

মৃত্যুটঙ্কার সংযুক্তং শার্ঙ্গধন্ৱান মীশ্ৱরম্।
সদ্বস্ত্রাভরণোপেতং শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **30**॥

যন্নামস্মরণাৎসর্ৱ ভূতৱেতাল রাক্ষসাঃ।
শত্রৱঃ প্রলযং যান্তি শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **31**॥

হং বীজনাদং সর্ৱেশং শরণং ৱরযাম্যহম্।
উপাযভূতং লক্ষ্মীশং শ্রীং ক্ষ্রৌং হ্রীং নৃহরিং ভজে॥ **32**॥

**ফলশ্রুতিঃ**

ভরদ্বাজকৃতং স্তোত্রং মন্ত্রজার্ণৱ সংভৱম্।
সকৃৎপঠনমাত্রেণ সর্ৱদুঃখৱিনাশনম্॥ **1**॥

রাজৱশ্যং জগদ্বশ্যং সর্ৱৱশ্যং ভৱেদধ্রুৱম্।
ভূতপ্রেত পিশাচাদি ৱ্যাধি দুর্ভিক্ষতস্করাঃ॥ **2**॥

দূরাদেৱ প্রণশ্যন্তি সত্যং সত্যং ন সংশযঃ।
ৱিদ্যার্থী লভতে ৱিদ্যাং ধনার্থী লভতে ধনম্॥ **3**॥

সর্ৱার্থী সর্ৱমাপ্নোতি মোক্ষার্থী মোক্ষমাপ্নুযাৎ।
যং যং কামযতে চিত্তং তং তং প্রাপ্নোতি নিশ্চযম্॥ **4**॥

॥ শ্রী নৃসিংহ দ্বাত্রিংশৎ বীজমালা স্তোত্রং সমাপ্তম্॥